संस्कृत-वार्ता:
07.07.2024
सायम् - 06:20

<u>मुख्यवार्ता:</u>

- राष्ट्रपति: दौपदी मुर्मु: पूरीरथयात्रासमारोहे गृह्णीयात् भागम्।
- प्रधानमन्त्री नरेन्द्रमोदी श्वः प्रभृति त्रिदिवसीय: रूस-आस्ट्रिया-देशयोः आधिकारिकप्रवासक्रमे रत: स्यात्।
- दक्षिणकश्मीरस्य कुलगामजनपदे सुरक्षाबलेन आतंकवादिभिः सह संघर्षे षडातंकवादिनः व्यापादिताः।
- अद्य एशियन्-डबल्स्-स्क्वाश्-च्याम्पियन्शिप्-क्रीडायां भारतस्य अभय् सिंह: विजयं अवाप्तवान्।

<u>पूरी रथ-यात्रा</u>

यत्र अद्य सायङ्काले पंचवादने रथम् आकर्ष्य भगवतः पवित्रं दर्शनं प्राप्तुं विश्वस्य विभिन्नेभ्यः भागेभ्यः लक्षशः भक्ताः समागताः सन्ति। श्री-जगन्नाथ-मन्दिरस्य सिंहद्वारस्य पुरतः रथ: स्थित: अस्ति। अयं उत्सवः पवित्रस्त्रीत्वस्य स्वमातुल्या गुण्डिचा-देव्याः मन्दिरं प्रति यात्रां निर्दिशति, अष्टदिनानन्तरं तेषां पुनरागमनात् समाप्यते च। ओडिशाराज्यस्य पुरी-नगरस्य द्वादश शताब्द्याः श्री जगन्नाथदेवालयात् भगवतः जगन्नाथः, भगवतः बलभद्रः, देवी सुभद्रा, भगवतः सुदर्शनः च बाह्यलोकं प्रति दिव्ययात्रा अद्य अपराह्णे आरब्धा। 'ढाडी पहण्डी' इति नाम्नः विस्तृतविधिना सह यस्य शाब्दिकः अर्थः अस्ति यत् घण्टायाः, काहली इत्यस्य, तेङ्गी इत्यस्य च वाद्यानां नादस्य ध्वन्या सह अनेकानां भक्तानां सहगमनार्थं क्रमेण अग्रे गमिष्यताम् इति। पुरीगजपति-दिव्यसिंह-देबः, त्रयाणां रथानाम् उपरि सुवर्ण-सम्मर्जनीद्वारा त्रयाणां रथानां पीठस्थानानि स्वच्छं कृत्वा, 'चेरापाहन्रा' इति प्रदर्शनं करिष्यति। अद्य सायङ्काले चतुर्थदिनाङ्कपर्यन्तं विधिः अवसीयते। राष्ट्रपति-द्रौपदी-मुर्मू-वर्याया: कृते विशिष्टसुरक्षाव्यवस्था अस्ति, ओडिशाराज्यस्य राज्यपालस्य, मुख्यमन्त्रिन:, केन्द्रीय-मन्त्रिणां, अन्य-विशिष्टजनानां च कृते अति विशिष्टसुरक्षाव्यवस्थापि कृतास्ति।

प्रधानमन्त्री रूस-आस्ट्रिया-यात्रा

प्रधानमन्त्री नरेन्द्रमोदी श्वः प्रभृति रूस-आस्ट्रिया-देशयोः आधिकारिकप्रवासक्रमे रत: स्यात्। प्रधानमन्त्री नरेन्द्रमोदी जूनमासस्य अष्टमे दशमे च दिनाङ्कयो: रशियादेशस्य द्वि दिनात्मके यात्राक्रमे देशद्वयगते शिखर सम्मेलने भागं गृह्णीयात्। तत्र द्वयो: देशयो: बह्वायामपरस्य संबंधस्य विस्तृत समीक्षाया: संभावाना अस्ति। एतस्य अनन्तरं प्रधानमंत्री नरेंद्र मोदी ओस्ट्रिया देशं प्रति गंतुं सिद्धं स्यात्। भ्रमणस्यास्य प्रथमचरणे श्री मोदी रूसदेशस्य राष्ट्रपतिव्लादिमीर् पुटिन् इत्यस्य आमन्त्रणेन द्वाविंशति: तमे भारत-रूस-वार्षिकशिखरसम्मेलने भागं गृह्णीयात्। अस्यायोजनं मास्कोनगरे भविता। नेतारः द्वयोः देशयोः बहुपक्षीयसम्बन्धानां विषये समीक्षां कुर्यू: तथा च परस्परहितस्य समकालीनक्षेत्रीयवैश्विकविषयेषु विचाराणां आदानप्रदानं कुर्यु:। रूसयात्रायाः समापनानन्तरं प्रधानमन्त्री मंगलवासरे आस्ट्रियादेशं यास्यति। एकचत्वारिंशत् वर्षानन्तरं भारतीयप्रधानमन्त्रिण: आस्ट्रियादेशस्य प्रथमा यात्रा भवेत्।

कश्मीर-कुलगाम-व्यापादनम्

दक्षिणकश्मीरस्य कुलगामजनपदे सुरक्षाबलेन आतंकवादिभिः सह संघर्षे षडातंकवादिनः व्यापादिताः। फ्रिसल- चिन्नीगामक्षेत्रे एवं मोटेरगामजनपदे अयं संघर्षः ह्यः मध्याह्ने समारब्धः,यदा आरक्षिदलेन आतंकवादिनां आस्थानस्य सूचना प्राप्ता, आरक्षक-महानिदेशकेन आर.आर. स्वैनेन वार्ताहरैः सह संवादे एतत् पुष्टीकृतम्।
अस्मिन् संघर्षे द्वौ सुरक्षाधिकारिणौ अपि मृत्युं प्राप्तवन्तौ।अत्रान्तरे मोटेरगामस्थले एवं फ्रिसलचिन्नीगामक्षेत्रे इत्युभयोः संघर्षस्थलयोः अद्यापि अभियानं यथावस्थमेव प्रचालितम्।

सपाप्रमुखा-मायावती

तमिलनाडुराज्ये आर्मस्ट्रांग इत्यस्य हनन प्रकरणे बसपा प्रमुख मायावती सी-बी-आई-अन्वेषणस्य याचनाम् अकरोत्। अद्य चेन्नईनगरे पार्थिवदेहाय पुष्पांजलि: समर्पणानन्तरं तथा कथितं यत् तस्या: दलं अस्य प्रकरणस्य निष्पक्षान्वेषणार्थं बलं प्रदास्यति। मायावतीम् अतिरिच्य इतोऽपि विभिन्न-दलीया: नेतार: दिवंगतनेतारं श्रद्धांजलिं समर्पयितुं समागता:।

## संसद-बजटसत्रम् :

संसद: वित्तसंकल्पनासत्रस्य आरम्भः अस्य मासस्य द्वाविंशति: दिनाङ्कात् भविष्यति। संसदीयकार्याणां मन्त्री किरेन् रिजिजुः एकस्मिन् सामाजिकान्तर्जालीय सन्देश माध्यमेन सूचितवान् यत् सत्रं अगस्त मासस्य द्वादश दिनांकपर्यन्तं निरन्तरं भविष्यति। सः अवदत्, चतुर्विंशत्यधिक द्विसहस्र पञ्चविंशत्यधिक द्विसहस्र तम वर्षस्य केन्द्रीय वित्तसंकल्पनापत्रं जुलाई त्रयोविंशति दिनाङ्के लोकसभायां प्रस्तुतं भविष्यति। श्रीरिजिजुः अवदत् यत्, राष्ट्रपतिः द्रौपदी मुर्मू भारतसर्वकारस्य अनुशंसया वित्तसंकल्पनासत्राय संसदः द्वयोः सदनयोः आह्वानस्य प्रस्तावस्य अनुमोदनं कृतवति।

## ऋतु विज्ञान

भारतीय ऋतु विज्ञान विभागेन अद्य उत्तराखंडे प्रचण्डवृष्टे: अनुमान: कृत:। सममेव उत्तरप्रदेश-ओडिशा-मध्यप्रदेश, दक्षिण कर्नाटक राज्येषु च प्रचण्डवृष्टे: अनुमान: कृत:। आगामिषु पञ्चदिवसेषु उत्तर-पश्चिम मध्य भारतयो: मेघगर्जन सहितं प्रचण्डवृष्टे: सम्भावना वर्तते। विभागस्यानुसारं श्व: यावत् असम-मेघालयो:, बुधवासर पर्यन्तं पश्चिमबङ्ग-सिक्किम-बिहार राज्येषु अथ गुरूवासरपर्यन्तं नागालैण्ड मणिपुर-मिजोरम-त्रिपुरा राज्येषु च प्रचण्डवृष्टि: भवितुमर्हति।

## असम-जलाप्लाव:

असमराज्ये जलौघस्थितौ अद्य किंचित् परिष्कार: समाप्त:। यद्यपि ऋतु-विज्ञान-विभागेन बराकोपत्यकायां अतिवृष्टे: अनुमानं व्यक्तीकृतम्। राज्ये प्रायश: चतुर्विंशतिलक्ष-जना: जलाप्लावेन प्रभाविता: समभवन्। त्रिंपचाशदधिकौ जनै त्रिशताधिकेषु शिविरेषु शरणागति: स्वीकृतास्ति। राष्ट्रीय-एवं-राज्य आपत्प्रबन्धन-बलं सहैव अन्यानि अभिकरणानि आपदुद्धरण कार्येषु संलग्नानि सन्ति। अत्रान्तरे गुवाहाट्यां अष्टवर्षीय-बालकस्य श्व: त्रिदिवसात्क-अन्वेषणानन्तरं सम्प्राप्त।

## दिल्लीभाजपा-उपवेशनम्

केन्द्रीयमन्त्री एवं वरिष्ठभाजपानेता पीयूषगोयलः प्रोक्तवान् यत् जनैः एनडीए-सर्वकाराय यः जनादेशः प्रदत्तः सः सर्वकारस्य विगतदशवर्षेषु कृतकार्याणां परिणामः अस्ति। दिल्लीभाजपायाः विस्तृत-कार्यकारिण्योपवेशनस्य उद्घाटनसत्रे स्वीयसम्बोधनावसरे श्री गोयलेन कथितं यत् मोदीसर्वकारेण विभिन्नयोजनानां कार्यान्वयनेन देशः परिवर्तितः। श्री गोयलेन विज्ञापितं यत् प्रधानमन्त्रिणा स्वीयतृतीय-कार्यकाले देशे त्रिस्तरीयविकासस्य निर्णयः कृतः। कांग्रेसदलम् आलक्ष्य कटाक्षं कुर्वन् श्री गोयलेन कथितं यत् निर्वाचनेषु देशस्य जनैः

विपक्षस्य निराकरणं कृतम्। उपवेशनेऽस्मिन् बीजेपीसांसदः मनोज तिवारी, रामवीर-सिंह-बिधूड़ी इत्येतौ समेत्य अन्येऽपि दलनेतारः उपस्थिताः आसन् ।

स्क्वाश्

अद्य एशियन्-डबल्स्-स्क्वाश्-च्याम्पियन्शिप्-क्रीडायां भारतस्य अभय् सिंह: विजयं अवाप्तवान्। पुरुषयुगलस्य अभय-वेलावन्-सेन्थिल्कुमा-युगलम् पुरुषयुगलस्य अन्तिमस्पर्धायां मलेशिया-देशस्य ओङ्ग्-साई-हङ्ग् सैफिक्-कमल् इत्युभाभ्यां सह स्पर्धितवान्। उपान्त्यक्रीडायां अभय-वेलावन्-युगलेन जपान्-देशस्य टोमोटक-एन्डो- नाओकी-हयाशी इत्येतौ पराजितौ।

।। इति वार्ता: ।।